=1

Nirvanamanjari

# નિર્વાણમઞ્જરી

## Document Information

Text title : Nirvanamanjari

File name : nirvanamanjari.itx

Category : vedanta, upadesha, shankarAchArya

Location : doc_z_misc_shankara

Author : Adi Shankaracharya

Transliterated by : Sunder Hattangadi

Proofread by : Sunder Hattangadi

Translated by : -

Description-comments : 12 verses on atman-brahman identity

Latest update : April 02, 2002

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

June 25, 2024

*sanskritdocuments.org*

# નિર્વાણમઞ્જરી

અહં નામરો નૈવ મર્ત્યો ન દૈત્યો
ન ગન્ધર્વયક્ષઃ પિશાચપ્રભેદઃ ।
પુમાન્નૈવ ન સ્ત્રી તથા નૈવ ષણ્ઢઃ
પ્રકૃષ્ટઃ પ્રકાશસ્વરૂપઃ શિવોઽહમ્ ॥ ૧॥

અહં નૈવ બાલો યુવા નૈવ વૃદ્ધો
ન વર્ણી ન ચ બ્રહ્મચારી ગૃહસ્થઃ ।
વનસ્થોઽપિ નાહં ન સંન્યસ્તધર્મા
જગજ્જન્મનાશૈકહેતુઃ શિવોઽહમ્ ॥ ૩॥

અહં નૈવ મેયસ્તિરોભૂતમાયા
તથૈવેક્ષિતું માં પૃથઙ્નાસ્ત્યુપાયઃ ।
સમાશ્લિષ્ટકાયત્રયોઽપ્યદ્વિતીયઃ
સદાતીન્દ્રિયઃ સર્વરૂપઃ શિવોઽહમ્ ॥ ૩॥

અહં નૈવ મન્તા ન ગન્તા ન વક્તા
ન કર્તા ન ભોક્તા ન મુક્તાશ્રમસ્થઃ ।
યથાહં મનોવૃત્તિભેદસ્વરૂપ-
સ્તથા સર્વવૃત્તિપ્રદીપઃ શિવોઽહમ્ ॥ ૪॥

ન મે લોકયાત્રાપ્રવાહપ્રવૃત્તિ-
ર્ન મે બન્ધબુદ્ધ્યા દુરીહાનિવૃત્તિઃ ।
પ્રવૃત્તિર્નિવૃત્ત્યાસ્ય ચિત્તસ્ય વૃત્તિ-
ર્યતસ્તન્વહં તત્સ્વરૂપઃ શિવોઽહમ્ ॥ ૫॥

નિદાનં યદજ્ઞાનકાર્યસ્ય કાર્યં
વિના યસ્ય સત્ત્વં સ્વતો નૈવ ભાતિ ।
યદાદ્યન્તમધ્યાન્તરાલાન્તરાલ-
પ્રકાશાત્મકં સ્યાત્તદેવાહમસ્મિ ॥ ૬॥

યતોઽહં ન બુદ્ધિર્ન મે કાર્યસિદ્ધિ-
ર્યતો નાહમઙ્ગં ન મે લિઙ્ગભઙ્ગમ્ ।
હૃદાકાશવર્તી ગતાઙ્ગત્રયાર્તિઃ
સદા સચ્ચિદાનન્દમૂર્તિઃ શિવોઽહમ્ ॥ ૭॥

યદાસીદ્વિલાસાદ્વિકારં જગદ્ય-
દ્વિકરાશ્રયં નાદ્વિતીયત્વતઃ સ્યાત્ ।
મનોબુદ્ધિચિત્તાહમાકારવૃત્તિ-
પ્રવૃત્તિર્યતઃ સ્યાત્તદેવાહમસ્મિ ॥ ૮॥

યદન્તર્બહિર્વ્યાપકં નિત્યશુદ્ધં
યદેકં સદા સચ્ચિદાનન્દકન્દમ્ ।
યતઃ સ્થૂલસૂક્ષ્મપ્રપઞ્ચસ્ય ભાનં
યતસ્તત્પ્રસૂતિસ્તદેવાહમસ્મિ ॥ ૯॥

યદર્કેન્દુવિદ્યુત્પ્રભાજાલમાલા-
વિલાસાસ્પદં યત્સ્વભેદાદિશૂન્યમ્ ।
સમસ્તં જગદ્યસ્ય પાદાત્મકં સ્યા-
દ્યતઃ શક્તિભાનં તદેવાહમસ્મિ ॥ ૧૦॥

યતઃ કાલમૃત્યુર્બિભેતિ પ્રકામં
યતશ્ચિત્તબુદ્ધીન્દ્રિયાણાં વિલાસઃ ।
હરિબ્રહ્મરુદ્રેન્દ્રચન્દ્રાદિનામ-
પ્રકાશો યતઃ સ્યાત્તદેવાહમસ્મિ ॥ ૧૧॥

યદાકાશવત્સર્વગં શાન્તરૂપં
પરં જ્યોતિરાકારશૂન્યં વરેણ્યમ્ ।
યદાદ્યન્તશૂન્યં પરં શઙ્કરાખ્યં
યદન્તર્વિભાવ્યં તદેવાહમસ્મિ ॥ ૧૨॥

ઇતિ શ્રીમત્પરમહંસપરિવ્રાજકાચાર્યસ્ય
શ્રીગોવિન્દભગવત્પૂજ્યપાદશિષ્યસ્ય
શ્રીમચ્છઙ્કરભગવતઃ કૃતૌ
નિર્વાણમઞ્જરી સમ્પૂર્ણા ॥

Encoded by Sunder Hattangadi

*Nirvanamanjari*

pdf was typeset on June 25, 2024

Please send corrections to *sanskrit@cheerful.com*